# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल्, २०१९

| | | |
|---|---|---|
| कक्षा – आचार्यप्रथमवर्षम् (SEM-2) | **प्रश्नपत्रम् – 3** | गुणाः - ७० |
| विषयः – वेदः | **कोड – C.C.4.2.5** | समयः -११: त: २: |
| दिनाङ्कः - १२/०४/२०१९ | सन्दर्भग्रन्थः – निरुक्तम् | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोरन्यतरस्य व्याख्या विधीयताम्।** ०५

(१) समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः।
आ च वह मित्र महश्चिकित्वाँस्त्वं दूतः कविरसि प्रचेताः॥

(२) नराशंसस्य महिमानमेषामुपस्तोषाम यज्ञियस्य यज्ञैः।
ये सुक्रतवः शुचयो धियन्धा स्वदन्ति देवा उभयानि हव्या॥

**प्रश्नः – २** द्वादशाप्रीदेवेषु बर्हिरित्यस्य वर्णनं कुरुत १०

अथवा

निरुक्तदिशा "अग्निरेव द्रविणोदा" इति शाकपूणेः वचनमुपस्थापयत।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ अधोलिखितयोरन्यतरस्य व्याख्यां कुरुत।** ०५

(१) आप्रीसूक्तानि। (२) स्वाहाकृतयः।

**प्रश्नः – ४** निरुक्तस्य अष्टमाध्यायस्य तृतीयपादस्य विषयवस्तु प्रस्तूयताम्। १०

अथवा

प्रयाजानुयाजदेवानां विषये एकं निबन्धं लिखत।

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ५ एकस्य व्याख्या कार्या।** ०५

(१) आदित्यः।

(२) अग्निः।

**प्रश्नः – ६** त्रयोदशाध्याये प्रतिपादितस्य अश्विनीकुमारयोः निरूपणं कुरुत। १०

अथवा

अक्षरब्रह्मणः स्वरूपं महत्त्वं च निरुक्तदिशा वर्णयत।

**चतुर्थान्वितिः (Unit-४)**

**प्रश्नः – ७ अधोलिखितयोरन्यतरस्य व्याख्या विधीयताम्।** ०५

(१) विप्रं विप्रासोऽवत देवं मर्तास ऊतये। अग्निं गीर्भिर्हवामहे।

(२) न विजानामि यदि वेदमस्मि निण्यः सन्नद्धो मनसा चरामि।
यदा मागन् प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः॥

प्रश्नः – ८ निरुक्तदिशा 'द्वा सुपर्णा सयुजा सखाया' इति मन्त्रस्य आध्यात्मिकस्वरूपं विवेचयत। १०

अथवा

कतिकाण्डात्मकं निरुक्तम् इति प्रतिपाद्य नैघुण्टककाण्डस्य वैशिष्ट्यं प्रतिपादयत।

**प्रश्नः – ९ अधस्तनेषु दशप्रश्नाः समाधेयाः।** **१०**

(१) "नराशंसः" इति शब्दस्य निर्वचनं किम् ?

(२) ऋषीणां पुत्रः कः ?

(३) द्रविणम्' इति शब्दस्य कोऽर्थः ?

(४) निरुक्तम् कतिविधम् ?

(५) "धियन्धाः"इति शब्दस्य कोऽर्थः ?

(६) आप्रियशब्दस्य कोऽर्थः ?

(७) "पिश" इति शब्दस्य कोऽर्थः ?

(८) प्रयाजानुयाजविषये ब्राह्मणवचनं किम् ?

(९) वनस्पतिरेव यूपः - इति कस्य वचनम् ?

(१०) "तुर्फरीः" इत्यस्य कोऽर्थः ?

(११) निरुक्तस्य सम्बन्धः वेदपुरुषस्य केनाङ्गेन सह वर्तते ?

(१२) यज्ञस्वरूपस्य ब्रह्मणः के सन्ति सप्तहस्ताः ?

(१३) तिस्रो वाचः ईरयन्ति, इत्यस्य कोऽर्थः ?

(१४) शरीरे कति सन्धयः सन्ति ?

(१५) 'पुल्वघ' इति शब्दस्य कोऽर्थः ?

***

विषयः – वेदः                                    **कोड – C.C.4.2.5**                     समयः -

दिनाङ्कः -   /०४/२०१९                  सन्दर्भग्रन्थः – निरुक्तम्

**प्रश्नः – ९**     अधस्तनेषु दश प्रश्नाः समाधेयाः ।                                                                    १०

(१) "नराशंसोः" इति शब्दस्य निर्वचनं किम्? नरैः मनुष्यैः शस्यते स्तूयते इति नराशंसः

(२) ऋषीणां पुत्रः कः ? ऋषीणां पुत्रो अधिराज एषः (अग्निः)

(३) द्रविणम्:' इति शब्दस्य कोऽर्थः ? धनम् बलम् वा

(४) निरुक्तम् कति विधम्? पञ्चविधम् निरुक्तम्

(५) " धियन्धाः"इति शब्दस्य कोऽर्थः ? स्वाधिकारकर्मणां धारयितारः मतीनां वा

(६) आप्रियशब्दस्य कोऽर्थः ? आप्नोतेः प्रीणतेर्वा

(७) "पिश" इति शब्दस्य कोऽर्थः ? रूपनाम

(८) प्रयाजानुयाजविषये ब्राह्मणवचनं किम्? आग्नेया वै प्रयाजा आग्नेया अनुयाजा इति ब्राह्मणम् ।

(९) वनस्पतिरेव युपः -इति कस्य वचनम्? काथक्यस्य

(१०) "तुर्फरीः" इत्यस्य कोऽर्थः ? हन्तरौ

(११) निरुक्तस्य सम्बन्धः वेदपुरुषस्य केनाङ्गेन सह वर्तते ? श्रोत्रेण सह

(१२) यज्ञस्वरूपस्य ब्रह्मणः के सन्ति सप्तहस्ताः ? सप्त छन्दांसि

(१३) तिस्रो वाचः ईरयन्ति, इत्यस्य कोऽर्थः ? ऋग्यजुः सामरूपास्तुतिः तिस्रो वाचः ईरयति नाम प्रेरयति ।

(१४) शरीरे कियत्संधयः सन्ति? अष्टोत्तर शतम्

(१५) 'पुल्वघ' इति शब्दस्य कोऽर्थः ? बहुभक्षकः